# shrii dhana dhaanya mahaa lakShmii puujaa

October 19, 1998

Duration - start to aaratii - 1.5 hours (abridged version)

## Check List

1. Altar, Deity (Mahaalakshmii idol / photo),
2. Two big brass lamps (with wicks, oil/ghee)
3. Matchbox, Agarbatti, Karpoor
4. One aaratii (for Karpoor), Two Aaratiis with wicks
5. Gandha Powder, Kumkum, gopichandan, haldi
6. Sri Mudra (for Sandhyaavandan), Vessel for Tirtha, Yajnopaviita
7. Puujaa Conch, Bell
8. Flowers, tulsi leaves
9. Akshata - unbroken rice colored with haldii or kumkum (in a container)
10. Decorated Copper or Silver Kalasha
11. Two pieces of cloth (new),
12. Coconut, 1/2 kg. Rice, Bananas 6, gold coin, gold chain
13. 3 trays and 3 vessels for Abhisheka
14. Beetlenuts 6, Beetlenut Leaves 12, Banana Leaves 2, Mango Leaves 5-25
15. Dry Fruits, Fruits, 5 bananas, 1 coconut - all for naivedya
16. Panchaamrita - Milk, Curd, Honey, Ghee, Sugar, Tender Coconut Water
17. Puja Book, Sri Lakshmii ashTottara Book
18. Dora (thread)
19. If doing Suvasini Puja, appropriate gift (Saree, Blouse piece, etc.)

Previous Night, think of the Divine Mother - Goddess Lakshmii and mentally decide to perform puujaa the next day. This is the sankalpa. Invite your relatives, friends (who have bhakti in the Goddess) for the puja.

Next day early morning keep the same thoughts of worshipping the Goddess and take a head-bath (if possible an oil-bath). Observe Fast (if possible).

Decorate the front door, altar and the place near the altar. Make appropriate kolam / rangoli / alpana / chowk. Keep all the things for puujaa ready, near the altar. Wash Kalasha and fill it with clean water upto 3/4 of it. Cover and place it near the altar.

Have some soothing Indian Music (Shehnai or sa.ntuur or sitaar or naadasvaram - preferably any instrumental) going on in the background till the puujaa begins. The music should be pleasing (not too loud) for creating a serene mood. (Of course people should be internally peaceful also!)

Those who are not directly performing the puja may participate by listening to puja or reading it mentally from printed handouts. They should take part by repeating the naama puujaa, aShTottara puujaa etc. as instructed by the puja leader. At other times they may sing some bhajans to please the Divine Mother. The puja time should not be used for socializing / gossip etc. but rather for focussing our thoughts on the all merciful Lord.

# श्री धनधान्यमहालक्ष्मी पूजा

## आश्विज मास कृष्ण पक्ष चतुर्दशी

## दीपावली पूजा

1. At the regular Altar

ॐ सर्वेभ्यो गुरुभ्यो नमः ।
ॐ सर्वेभ्यो देवेभ्यो नमः ।
ॐ सर्वेभ्यो ब्राह्मणेभ्यो नमः ॥
प्रारंभ कार्यं निर्विघ्नमस्तु । शुभं शोभनमस्तु ।
इष्ट देवता कुलदेवता सुप्रसन्ना वरदा भवतु ॥
अनुज्ञां देहि ॥

२ आचमनः
ask everyone to repeat
(At Shrii Lakshmi Altar)
(Sip a drop of water after each mantra)

ॐ केशवाय स्वाहा । ॐ नारायणाय स्वाहा ।
ॐ माधवाय स्वाहा ।

(Now we chant the 21 names of the Lord, in order to concentrate on the Lord)

ॐ गोविंदाय नमः । ॐ विष्णवे नमः ।
ॐ मधुसूदनाय नमः । ॐ त्रिविक्रमाय नमः ।
ॐ वामनाय नमः । ॐ श्रीधराय नमः ।
ॐ हृषीकेशाय नमः । ॐ पद्मनाभाय नमः ।
ॐ दामोदराय नमः । ॐ सङ्कर्षणाय नमः ।
ॐ वासुदेवाय नमः । ॐ प्रद्युम्नाय नमः ।
ॐ अनिरुद्धाय नमः । ॐ पुरुषोत्तमाय नमः ।
ॐ अधोक्षजाय नमः । ॐ नारसिंहाय नमः ।
ॐ अच्युताय नमः । ॐ जनार्दनाय नमः ।
ॐ उपेंद्राय नमः । ॐ हरये नमः ।
श्री कृष्णाय नमः ॥

---

प्राणायामः

ॐ प्रणवस्य परब्रह्म ऋषिः । परमात्मा देवता ।
दैवी गायत्री छन्दः । प्राणायामे विनियोगः ॥

ॐ भूर्भुवः स्वः तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ।

ॐ भूः । ॐ भुवः । ॐ स्वः । ॐ महः ।
ॐ जनः । ॐ तपः । ॐ सत्यम् ।
ॐ तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमही
धियो योनः प्रचोदयात् ॥

पुनराचमन
(Repeat Achamana 2 - given above)
ॐ आपोज्योति रसोमृतं ब्रह्म भूर्भुवस्सुवरोम् ॥
(Apply water to eyes and understand that you are of the nature of Brahman)

---

३ सङ्कल्पः
(Stand and hold a fruit in hand during sankalpa)

ॐ श्रीमान् महागणाधिपतये नमः ।
(Prostrations to Lord Ganesha)
श्री गुरुभ्यो नमः ।
(Prostrations to your Guru / Spiritual Teacher)
श्री सरस्वत्यै नमः ।
(Prostrations to Goddess Sarasvati)
इष्टदेवताभ्यो नमः ।
(Prostrations to your favorite deity)
कुलदेवताभ्यो नमः ।
(Prostrations to your family deity)
स्थान देवताभ्यो नमः ।
(Prostrations to the deity of this house)
ग्रामदेवताभ्यो नमः ।
(Prostrations to the deity of this place)
वस्तुदेवताभ्यो नमः ।
(Prostrations to the deity of all the materials we have collected)
उमामहेश्वराभ्यां नमः ।
(Prostrations to Shiva and pArvati)
मातापितृभ्यां नमः ।
(Prostrations to our parents)
लक्ष्मीनारायणाभ्यां नमः ।
(Prostrations to the Lords who protect us - LakShmi and NArAyaNa)
सर्वेभ्यो देवेभ्यो नमो नमः ।
(Prostrations to all the Gods)
सर्वेभ्यो ब्राह्मणेभ्यो नमो नमः ।
(Prostrations to all Brahamanas - those who are in the religious path)
येतद्कर्मप्रधान देवताभ्यो नमो नमः ।
(Prostrations to Goddess dhana dhaanya mahaa laxmi, the main deity of this puja)

॥ अविघ्नमस्तु ॥
let there be no obstacles

सुमुखश्च एकदंतश्च कपिलो गजकर्णकः ।
लंबोदरश्च विकटो विघ्ननाशो गणाधिपः ॥
धूम्रकेतुर्गणाध्यक्षो बालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेत् श्रुणुयादपि ॥
विद्यारंभे विवाहे च प्रवेशे निर्गमे तथा ।
संग्रामे सङ्कटेश्चैव विघ्नः तस्य न जायते ॥

(Whoever chants or hears these 12 names of Lord Ganesha will not have any obstacles in all their endeavours)

सर्वमङ्गल माङ्गल्ये शिवे सर्वार्थ साधिके ।
शरण्ये त्र्यंबके देवी नारायणी नमोऽस्तुते ॥

(We completely surrender ourselves to that Goddess who embodies auspiciousness, who is full of auspicious-ness and who brings auspicousness to us)

विनायकं गुरुं भानुं ब्रह्माविष्णुमहेश्वरान् ।
सरस्वतीं प्रणम्यादौ सर्व कार्यार्थ सिद्धये ॥

(To achieve success in our work and to find fulfillment we should first offer our prayers to Lord Vinayaka and then to our teacher, then to the Sun God and to the holy trinity of Brahma, ViShNu and Shiva, and to Goddess Sarasvati)

श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञाय प्रवर्तमानस्य अद्य ब्रह्मणोऽद्वितीयपरार्धे विष्णुपदे श्रीश्वेतवराहकल्पे वैवस्वतमन्वन्तरे भारतवर्षे भरतखंडे जंबूद्वीपे दण्डकारण्यदेशे गोदावर्या दक्षिणेतीरे कृष्णवेण्यो उत्तरेतीरे परशुरामक्षेत्रे or (सम्युक्त अमेरिका देशे purdue नगरे or Australia देशे Victoria ग्रामे or बह्रीनु देशे)
शालिवाहन शके वर्तमाने व्यवहारिके बहुधान्य नाम संवत्सरे, दक्षिणायणे, शरद् ऋतौ, आश्वियज मासे, कृष्ण पक्षे, चतुर्दश्याम् तिथौ, हस्ता नक्षत्रे, सोम वासरे, सर्व ग्रहेषु यथायथा राशिस्थान स्थितेषु सत्सु ग्रहगुणगणविशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्त फलप्राप्यर्थं धर्मार्थकाममोक्ष चतुर्विधपुरुषार्थसिध्यर्थं मम सकुटुम्बस्य क्षेम स्थैर्य आयुरारोग्य चतुर्विध पुरुषार्थ सिध्यर्थं अंगीकृत श्री धनधान्यमहालक्ष्मी व्रतांगत्वेन संपादित सामग्रय्या श्री धनधान्यमहालक्ष्मी प्रीत्यर्थं यथा शक्त्या यथा मिलित उपचार द्रव्यैः श्रीसूक्त पुराणोक्त मन्त्रैश्च ध्यानावाहनादि षोडशोपचारैः श्रीधनधान्यमहालक्ष्मी पूजनं अहं करिष्ये ॥

इदं फलं मया देवि स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥
(keep fruits in front of the Goddess)

---

४ षडङ्ग न्यास chanting optional
(Purifying the body)

---

५ कर न्यास chanting optional
(Purifying the hands)

ॐ ह्रां । अंगुष्ठाभ्यायां नमः । हृदयाय नमः ॥
(touch the thumbs)
ॐ ह्रीं । तर्जनीभ्यां नमः । शिरसे स्वाहा ॥
(touch both fore fingers)
ॐ ह्रुं । मध्यमाभ्यां नमः । शिखायै वौषट् ॥
(touch middle fingers)
ॐ ह्रैं । अनामिकाभ्यां नमः । कवचाय हुम् ॥
(touch ring fingers)
ॐ ह्रौं । कनिष्ठिकाभ्यां नमः । नेत्रत्रयाय वौषट् ॥
(touch little fingers)
ॐ ह्रः । करतलकरपृष्ठाभ्यां नमः । अस्त्राय फट् ॥
(touch palms and over sleeve of hands)

---

६ दिग्बन्धन

ॐ भूर्भुवस्वरोम् इति दिग्बन्धः ।
(snap fingers, circle them over the head clock-wise and clap hands)
दिशो बद्नामि ॥
(shut off all directions i.e. distractions so that we can concentrate on the Goddess)

---

७ गणपति पूजा

आदौ निर्विघ्नतासिध्यर्थं महा गणपतिं पूजनं करिष्ये ।
ॐ गणानां त्वा शौनको घृत्समदो गणपतिर्जगति गणपत्यावाहने विनियोगः ॥
(pour water- signifies making a promise)

ॐ गणानां त्वा गणपतिं हवामहे
कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत
आ नः श्रृण्वन्नूतिभिः सीदसादनम् ॥

भूः गणपतिं आवाहयामि ।
भुवः गणपतिं आवाहयामि ।

स्वः गणपतिं आवाह्यामि ।
ॐ भूर्भुवस्वः महागणपतये नमः ।
ध्यायामि । ध्यानं समर्पयामि ।

ॐ महागणपतये नमः । आवाह्नं समर्पयामि ।
ॐ महागणपतये नमः । आसनं समर्पयामि ।
ॐ महागणपतये नमः । पाद्यं समर्पयामि ।
ॐ महागणपतये नमः । अर्घ्यं समर्पयामि ।
ॐ महागणपतये नमः । आचमनीयं समर्पयामि ।
ॐ महागणपतये नमः । स्नानं समर्पयामि ।
ॐ महागणपतये नमः । वस्त्रं समर्पयामि ।
ॐ महागणपतये नमः । यज्ञोपवीतं समर्पयामि ।
ॐ महागणपतये नमः । चंदनं समर्पयामि ।
ॐ महागणपतये नमः । परिमल द्रव्यं समर्पयामि ।
ॐ महागणपतये नमः । पुष्पाणि समर्पयामि ।
ॐ महागणपतये नमः । धूपं समर्पयामि ।
ॐ महागणपतये नमः । दीपं समर्पयामि ।
ॐ महागणपतये नमः । नैवेद्यं समर्पयामि ।
ॐ महागणपतये नमः । ताम्बूलं समर्पयामि ।
ॐ महागणपतये नमः । फलं समर्पयामि ।
ॐ महागणपतये नमः । दक्षिणां समर्पयामि ।
ॐ महागणपतये नमः । आर्तिक्यं समर्पयामि ।

ॐ भूर्भुवस्वः महागणपतये नमः । मन्त्रपुष्पं समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः । प्रदक्षिणा नमस्कारान् समर्पयामि ।
ॐ भूर्भुवस्वः महागणपतये नमः । छत्रं समर्पयामि ।

ॐ महागणपतये नमः । चामरं समर्पयामि ।
ॐ महागणपतये नमः । गीतं समर्पयामि ।
ॐ महागणपतये नमः । नृत्यं समर्पयामि ।
ॐ महागणपतये नमः । वाद्यं समर्पयामि ।
ॐ महागणपतये नमः । सर्व राजोपचारान् समर्पयामि ॥

॥ अथ प्रार्थना ॥
ॐ वक्रतुण्ड महाकाय कोटि सूर्य समप्रभ ।
निर्विघ्नं कुरु मे देव सर्व कार्येषु सर्वदा ॥
ॐ भूर्भुवस्वः महागणपतये नमः । प्रार्थनां समर्पयामि ।

अनया पूजया विघ्नहर्ता महागणपति प्रीयताम् ॥

---

८ दीप स्थापना chanting optional

अथ देव्यै वाम भागे दीप स्थापनां करिष्ये ।
(light the lamps)

---

९ भूमि प्रार्थना

(open palms and touch the ground)

---

१० धान्य राशि
(Touch the grains/rice/wheat)

---

११ कलश स्थापना
you can keep the poorNa kumbha earlier to save time

(keep kalasha on top of rice pile)
(fill kalasha with water)
(sprinkle in/apply ga.ndha to kalasha)
(put beetle nut in kalasha)
(put jewels / washed coin in kalasha)
(put gold / dakShina in kalasha)
(put duurva / karika leaves in kalasha)
(put five leaves in kalasha)
(place coconut on top of kalasha)
(tie cloth for kalasha)

इति कलशं प्रतिष्ठापयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१२ कलश पूजन chanting optional

(Those who want to attain immortality take a dip in the confluence of the Ganges, yamuna and sarasvati rivers at the prayag. Let the water in this kalasha be the water from the holy rivers)

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्म मध्ये मातृगणाः स्मृताः ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

॥ कलशः प्रार्थनाः ॥ chanting optional

कलशः कीर्तिमायुष्यं प्रज्ञां मेधां श्रियं बलम् ।
योग्यतां पापहानिं च पुण्यं वृद्धिं च साधयेत् ॥

(Let this kalasha increase our life span, presence of mind, intellect,wealth, strength and status, destroy our sins and increase our merits or puNya)

सर्व तीर्थमयो यस्मात् सर्व देवमयो यतः ।
अथः हरिप्रियोसि त्वं पूर्णकुंभं नमोऽस्तुते ॥

(All the holy waters, and all the Gods are now present in this kalasha. Our prostrations to this puurNakumbha which is hence dear to Lord Hari)

कलशदेवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

---

१४ शङ्ख पूजन
(pour water from kalasha to sha Nkha
add ga.ndha flower to sha nNkha)

(This shaNkha has now become like the pAnchajanya, which has come out of the ocean and which is the hands of Lord MahaviShNu. Our prostrations to the pAnchajanya)

शङ्ख देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि॥

---

१५ घंटार्चना
(Pour drops of water from sha Nkha on top of the bell apply ga.ndha flower tot he bell)

(When the bell is rung, knowingly or unknowingly, all the good spirits are summoned and all the evil spirits are driven away)

घंटा देवताभ्यो नमः ।
सकल पूजार्थे अक्षतान् समर्पयामि ॥

(Ring the gha.nTA)

---

१६ आत्मशुद्धि chanting optional
( Sprinkle water from sha Nkha on puja items and devotees)

अपवित्रो पवित्रो वा सर्वावस्थांगतोपि वा ।
यः स्मरेत् पुंडरीकाक्षं सः बाह्याभ्यंतरः शुचिः ॥
A devotee, whether pure or impure or whatever condition (s)he is in, just by chanting the name of Achyutha (s)he will be pure inside and outside

---

१७ षट् पात्र पूजा (optional)
( put tulasi leaves or axata in empty vessels)

---

१८ पञ्चामृत पूजा

( put tulasi leaves or axataas in vessels containing milk, curd,ghee, honey, sugar)

---

१९ द्वारपालक पूजा

श्री धन धान्य महा लक्ष्म्यै नमः ॥
द्वारपालक पूजां समर्पयामि ॥

---

२० पीठ पूजा

श्री धन धान्य महा लक्ष्म्यै नमः ।
पीठ पूजां समर्पयामि ॥

---

२१ प्राण प्रतिष्ठा chanting is optional
hold flowers/axataa in hand;
chant dhyaan shloka thinking of Goddess)

अस्यां मूर्ते प्राणः तिष्ठंतुः ।
अस्यां मूर्ते जीवः तिष्ठन्तु ।
अस्यां मूर्ते सर्वेन्द्रियाणि मनस्त्वत्
चक्षुः श्रोत्र जिह्वा घ्राणैः वाङ्काणि
सुखेन स्थिरं तिष्ठन्तु स्वाहा ।

देवि सर्व जगन्माते यावत् पूजावसानकम् ।
तावत्वं प्रीतिभावेन कलशेस्मिन् सन्निधिं कुरु ॥

प्राणां प्रतिष्ठापयामि ॥
(offer flowers to the diety, kalasha)

---

२२ ध्यानं
(Close eyes and bring Goddess in your mind and chant )

ॐ (repeat 9 times)

पद्मासनां पद्मकरां पद्ममालाविभूषिताम् ।
क्षीरसागरसंभूतां क्षीरवर्णसमप्रभाम् ॥
क्षीरवर्णसमं वस्त्रं दधानां हरिवल्लभाम् ।
भावये भक्तियोगेन कलशेऽस्मिन् मनोहरे ॥

पद्मासने पद्मकरे, सर्वलोकैक पूजिते ।
नारायणप्रिये देवि सुप्रीता भव सर्वदा ॥

(you can add more related shlokas)

ॐ धन धान्य महा लक्ष्म्यै नमः । ध्यानात् ध्यानं समर्पयामि ॥

२३ आवाहनं
( hold flowers in hand)

सर्व मङ्गल माङ्गल्यै, विष्णु वक्ष स्थितालये ।
आवाहयामि देवि त्वां, सुप्रीता वरदा भव ॥

श्री धन धान्य महा लक्ष्म्यै नमः ।आवाहनं समर्पयामि ॥
(offer flowers to Goddess) ।

२४ आसनं

ॐ धन धान्य महा लक्ष्म्यै नमः ।आसनं समर्पयामि ॥
(offer flowers/axathaas)

२५ पाद्यं
(offer water)

ॐ धन धान्य महा लक्ष्म्यै नमः ।पादयोः पाद्यं समर्पयामि ॥

२६ अर्घ्यं
(offer water)

ॐ धन धान्य महा लक्ष्म्यै नमः ।अर्घ्यं समर्पयामि ॥

२७ आचमनीयं
(offer water or axathaa/ leave/flower)

ॐ धन धान्य महा लक्ष्म्यै नमः ।आचमनीयं जलं समर्पयामि ॥

२८ स्नानं

ॐ धन धान्य महा लक्ष्म्यै नमः ।मलापकर्श स्नानीयं जलं समर्पयामि ॥

२९ पञ्चामृत स्नानं
ॐ धन धान्य महा लक्ष्म्यै नमः ।पयः स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।दधि स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।घृत स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।मधु स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।शर्करा स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।गंधोदक स्नानं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।अभ्यंग स्नानं समर्पयामि ।
ॐ धन धान्य महा लक्ष्म्यै नमः ।अंगोद्वर्तनं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।उष्णोदक स्नानं समर्पयामि ॥

३० शुद्धोदक स्नानं (Pure water bath)

ॐ धन धान्य महा लक्ष्म्यै नमः ।शुद्धोदक स्नानं समर्पयामि ॥
सकल पूजार्थे अक्षतान् समर्पयामि ॥
(after sprinkling water around throw one tulasi leaf to the north)

३१ महा अभिषेकः
(Sound the bell let all pour water from kalasha directly)

श्री सूक्त chanting optional
try to chant one or more of the shlokas; these mantras are specially in praise of Goddess Laxmi.

हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥१॥

तां म आवह जातवेदो लक्ष्मीमनप गामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥२ ॥

अश्वपूर्वां रथमध्यां हस्तिनाद प्रमोदिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥३ ॥

कांसोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं तृप्तां तर्पयन्तीम् ।
पद्मेस्थितां पद्मवर्णां तामिहोपह्वये श्रियम् ॥४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके देव जुष्टामुदाराम् ।
तां पद्मिनीमीं शरणमहं प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥५ ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः ।
तस्य फलानि तपसानुदन्तुमायान्तरायाश्च बाह्या अलक्ष्मीः ॥६ ॥

उपैतुमां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं ददातु मे ॥७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥८ ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् ।
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥९ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः ॥१० ॥

कर्दमेन प्रजाभूतामयि सम्भवकर्दम ।
श्रियं वासय मे कुले मातरं पद्ममालिनीम् ॥११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीतवसमे गृहे ।
निचदेवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४ ॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान्विन्देयं पुरुषानहम् ॥ १५ ॥

यः शुचिः प्रयतो भूत्वा जुहुयादाज्यमन्वहम् ।
सूक्तं पञ्चदशर्चं च श्रीकामः सततं जपेत् ॥ १६ ॥

पद्मानने पद्म ऊरू पद्माक्षी पद्मसम्भवे ।
तन्मेभजसि पद्माक्षी येन सौख्यं लभाम्यहम् ॥ १७ ॥

अश्वदायी गोदायी धनदायी महाधने ।
धनं मे जुषतां देवि सर्वकामांश्च देहि मे ॥ १८ ॥

पद्मानने पद्मविपद्मपत्रे पद्मप्रिये पद्मदलायताक्षि ।
विश्वप्रिये विश्वमनोनुकूले त्वत्पादपद्मं मयि संनिधत्स्व ॥१९ ॥

पुत्रपौत्रं धनं धान्यं हस्त्यश्वादिगवेरथं ।
प्रजानां भवसि माता आयुष्मन्तं करोतु मे ॥ २० ॥

धनमग्निर् धनं वायुर्धनं सूर्यो धनं वसुः
धनमिन्द्रो बृहस्पतिर्वरुणं धनमस्तु ते ॥ २१ ॥

वैनतेय सोमं पिब सोमं पिबतु वृत्रहा ।
सोमं धनस्य सोमिनो मह्यं ददातु सोमिनः ॥ २२ ॥

महालक्ष्मी च विद्महे विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मीः प्रचोदयात् ॥ २३ ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । श्री सूक्त स्नानं समर्पयामि ॥

---

३२ प्रतिष्ठापना keep the idol after bath on altar

ॐ धन धान्य महा लक्ष्म्यै नमः ॥
(Repeat 12 times)

ॐ धन धान्य महा लक्ष्म्यै नमः ॥ सुप्रतिष्ठमस्तु ॥

---

३३ वस्त्र
(offer two pieces of cloth for the Goddess)

ॐ धन धान्य महा लक्ष्म्यै नमः । वस्त्रयुग्मं समर्पयामि ॥

---

३३.१ कंचुकी
ॐ धन धान्य महा लक्ष्म्यै नमः । कंचुकीं समर्पयामि ॥

---

३३.२ कण्ठ सूत्र
ॐ धन धान्य महा लक्ष्म्यै नमः । कण्ठसूत्रं समर्पयामि ॥

---

३३.३ ताडपत्राणि
ॐ धन धान्य महा लक्ष्म्यै नमः । ताडपत्राणि समर्पयामि ॥

---

३३.४ हरिद्रा
ॐ श्री धन धान्य महा लक्ष्म्यै नमः । हरिद्रा समर्पयामि ॥

---

३३.५ कुंकुम
ॐ श्री महा लक्ष्म्यै नमः । कुंकुमं समर्पयामि ॥

---

३३.६ कज्जल
ॐ श्री धन धान्य महा लक्ष्म्यै नमः । कज्जलं समर्पयामि ॥

---

३३.७ सिंदूर
ॐ श्री धन धान्य महा लक्ष्म्यै नमः । सिन्दूरं समर्पयामि ॥

---

३३.८ नाना आभरणं
ॐ श्री धन धान्य महा लक्ष्म्यै नमः । नाना आभरणानि समर्पयामि ॥

---

३३.९ नाना परिमल द्रव्य
ॐ श्री धन धान्य महा लक्ष्म्यै नमः । नाना परिमल द्रव्यं समर्पयामि ॥

---

३४ उपवीत yajnopaviita
ॐ धन धान्य महा लक्ष्म्यै नमः । उपवीतं समर्पयामि ॥

---

३५ गंध
ॐ धन धान्य महा लक्ष्म्यै नमः । गंधं समर्पयामि ॥

---

३६ नाना परिमल द्रव्य
ॐ धन धान्य महा लक्ष्म्यै नमः । नाना परिमल द्रव्यं समर्पयामि ॥

---

३७ अक्षत
ॐ धन धान्य महा लक्ष्म्यै नमः । अक्षतान् समर्पयामि ॥

---

३८ पुष्प
ॐ धन धान्य महा लक्ष्म्यै नमः । पुष्पाणि समर्पयामि ॥

३९ नाना अलंकार
ॐ धन धान्य महा लक्ष्म्यै नमः ।नाना अलंकारान् समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।हस्त भूषणं समर्पयामि ॥

४० अथाङ्गपूजा ask everyone to repeat
(for Goddess Lakshmi)

ॐ रमायै नमः ।पादौ पूजयामि ॥
ॐ क्षीराब्धितनयायै नमः ।गुल्फौ पूजयामि ॥
ॐ पद्मायै नमः ।जानुनी पूजयामि ॥
ॐ कमलायै नमः ।जङ्घे पूजयामि ॥
ॐ संपत्प्रदायिन्यै नमः ।ऊरून् पूजयामि ॥

ॐ विष्णुवल्लभायै नमः ।नाभिं पूजयामि ॥
ॐ कमलवासिन्यै नमः ।कुक्षिं पूजयामि ॥
ॐ सर्वदायिन्यै नमः ।उदरं पूजयामि ॥
ॐ हरिप्रियायै नमः ।हृदयं पूजयामि ॥
ॐ मङ्गलदेवतायै नमः ।वक्षस्थलं पूजयामि ॥

ॐ श्रियै नमः ।स्तनौ पूजयामि ॥
ॐ लोकमात्रे नमः ।बाहुं पूजयामि ॥
ॐ कमलहस्तायै नमः ।हस्तान् पूजयामि ॥
ॐ वरप्रदायै नमः ।भुजान् पूजयामि ॥
ॐ कंबुकण्ठ्यै नमः ।कण्ठं पूजयामि ॥

ॐ श्रुतिस्तुतायै नमः ।श्रोत्रं पूजयामि ॥
ॐ लोकजनन्यै नमः ।नेत्राणि पूजयामि ॥
ॐ प्रसन्नवदनायै नमः ।वदनं पूजयामि ॥
ॐ इंदिरायै नमः ।ललाटं पूजयामि ॥
ॐ क्षीरसागर कन्यायै नमः ।शिरः पूजयामि ॥

ॐ धन धान्य महा लक्ष्म्यै नमः ।सर्वाङ्गाणि पूजयामि ॥

४१ अथ पुष्प पूजा ask everyone to repeat

ॐ इंदिरायै नमः ।पूग पुष्पं समर्पयामि ॥
ॐ रमायै नमः ।जाजी पुष्पं समर्पयामि ॥
ॐ पद्मप्रियायै नमः ।चम्पक पुष्पं समर्पयामि ॥
ॐ हरिप्रियये नमः ।वकुल पुष्पं समर्पयामि ॥
ॐ लोकमात्रे नमः ।मल्लिका पुष्पं समर्पयामि ॥
ॐ पद्मनिलयायै नमः ।पद्म पुष्पं समर्पयामि ॥
ॐ कमलवासिन्यै नमः ।सेवन्तिका पुष्पं समर्पयामि ॥
ॐ वरलक्ष्म्यै नमः ।नीलोत्पल पुष्पं समर्पयामि ॥

ॐ सर्वैश्वर्य कारिण्यै नमः ।
नानाविध पुष्पाणि समर्पयामि ॥

४२ अथ पत्र पूजा ask everyone to repeat

ॐ धन धान्य महा लक्ष्म्यै नमः ।माचि पत्रं समर्पयामि ॥
ॐ मायायै नमः ।मरुग पत्रं समर्पयामि ॥
ॐ क्षेमंकर्यै नमः ।सेवंतिका पत्रं समर्पयामि ॥
ॐ शुभ प्रदायिन्यै नमः ।बिल्व पत्रं समर्पयामि ॥
ॐ त्रिपुरसुन्दर्यै नमः ।तुलसि पत्रं समर्पयामि ॥
ॐ विष्णुप्रियायै नमः ।विष्णुक्रांति पत्रं समर्पयामि ॥

ॐ धन धान्य महा लक्ष्म्यै नमः ।पत्रपूजां समर्पयामि ॥

४३ ग्रन्थि पूजा ask everyone to repeatHer name

ॐ रमायै नमः ।प्रथम ग्रंथिं पूजयामि ॥
ॐ सर्वमङ्गलायै नमः ।द्वितीय ग्रंथिं पूजयामि ॥
ॐ कमलवासिन्यै नमः ।तृतीय ग्रंथिं पूजयामि ॥
ॐ मन्मथजनन्यै नमः ।चतुर्थ ग्रंथिं पूजयामि ॥
ॐ विष्णुवल्लभायै नमः ।पंचम ग्रंथिं पूजयामि ॥
ॐ क्षीराब्धि कन्यायै नमः ।षष्ठ ग्रंथिं पूजयामि ॥
ॐ लोकमात्रे नमः ।सप्तम ग्रंथिं पूजयामि ॥
ॐ भार्गव्यै नमः ।अष्टम ग्रंथिं पूजयामि ॥
ॐ पद्महस्तायै नमः ।नवम ग्रंथिं पूजयामि ॥
ॐ पुष्ट्यै नमः ।दशम ग्रंथिं पूजयामि ॥
ॐ तुष्ट्यै नमः ।एकादश ग्रंथिं पूजयामि ॥
ॐ धनलक्ष्म्यै नमः ।द्वादश ग्रंथिं पूजयामि ॥

ॐ धन धान्य महा लक्ष्म्यै नमः ।ग्रंथि पूजां समर्पयामि ॥

४४ लक्ष्मी नाम पूजा ask everyone to repeat

ॐ महालक्ष्म्यै नमः ।
ॐ कमलायै नमः ।
ॐ पद्मासनयै नमः ।
ॐ सोमायै नमः ।
ॐ चन्डिकायै नमः ।
ॐ अनघायै नमः ।
ॐ रमायै नमः ।
ॐ पीताम्बरधारिण्यै नमः ।
ॐ दिव्यगन्धानुलेपनायै नमः ।
ॐ सुरूपायै नमः ।
ॐ रत्नदीप्तायै नमः ।
ॐ वाञ्छितार्थप्रदायिन्यै नमः ।
ॐ इंदिरायै नमः ।
ॐ नारायणायै नमः ।

ॐ कंबु ग्रीवायै नमः ।
ॐ हरिप्रियायै नमः ।
ॐ शुभदायै नमः ।
ॐ लोकमात्रे नमः ।
ॐ दैत्यदर्पापहारिण्यै नमः ।
ॐ सुरासुरपूजितायै नमः ।
ॐ धन धान्य महा लक्ष्म्यै नमः ।
ॐ लक्ष्मी पूजां समर्पयामि ।

---

४५ अष्टोत्तरशतनाम पूजा   ask everyone to repeat
Chant Dhyaan Shlokas

लक्ष्मीं क्षीरसमुद्रराजतनयां श्रीरङ्गधामेश्वरीं
दासीभूत समस्त देववनितां लोकैक दीपन्कुराम् ।
श्रीमन्मन्द कटाक्षलब्ध विभव ब्रह्मेन्द्र गङ्गाधरां
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम् ॥
ॐ प्रकृत्यै नमः ।
ॐ विकृत्यै नमः ।
ॐ विद्यायै नमः ।
ॐ सर्वभूतहितप्रदायै नमः ।
ॐ श्रद्धायै नमः ।
ॐ विभूत्यै नमः ।
ॐ सुरभ्यै नमः ।
ॐ परमात्मिकायै नमः ।
ॐ वाचे नमः ।

ॐ पद्मालयायै नमः ।
ॐ पद्मायै नमः ।
ॐ शुचये नमः ।
ॐ स्वाहायै नमः ।
ॐ स्वधायै नमः ।
ॐ सुधायै नमः ।
ॐ धन्यायै नमः ।
ॐ हिरण्मय्यै नमः ।
ॐ लक्ष्म्यै नमः ।

ॐ नित्यपुष्टायै नमः ।
ॐ विभावर्यै नमः ।
ॐ अदित्यै नमः ।
ॐ दित्यै नमः ।
ॐ दीप्तायै नमः ।
ॐ वसुधायै नमः ।
ॐ वसुधारिण्यै नमः ।
ॐ कमलायै नमः ।
ॐ कान्तायै नमः ।

ॐ कामाक्ष्यै नमः ।
ॐ क्रोधसंभवायै नमः ।
ॐ अनुग्रहप्रदायै नमः ।
ॐ बुद्धये नमः ।
ॐ अनघायै नमः ।
ॐ हरिवल्लभायै नमः ।
ॐ अशोकायै नमः ।
ॐ अमृतायै नमः ।
ॐ दीप्तायै नमः ।

ॐ लोकशोकविनाशिन्यै नमः ।
ॐ धर्मनिलयायै नमः ।
ॐ करुणायै नमः ।
ॐ लोकमात्रे नमः ।
ॐ पद्मप्रियायै नमः ।
ॐ पद्महस्तायै नमः ।
ॐ पद्माक्ष्यै नमः ।
ॐ पद्मसुन्दर्यै नमः ।
ॐ पद्मोद्भवायै नमः ।

ॐ पद्ममुख्यै नमः ।
ॐ पद्मनाभप्रियायै नमः ।
ॐ रमायै नमः ।
ॐ पद्ममालाधरायै नमः ।
ॐ देव्यै नमः ।
ॐ पद्मिन्यै नमः ।
ॐ पद्मगन्धिन्यै नमः ।
ॐ पुण्यगन्धायै नमः ।
ॐ सुप्रसन्नायै नमः ।

ॐ प्रसादाभिमुख्यै नमः ।
ॐ प्रभायै नमः ।
ॐ चन्द्रवदनायै नमः ।
ॐ चन्द्रायै नमः ।
ॐ चन्द्रसहोदर्यै नमः ।
ॐ चतुर्भुजायै नमः ।
ॐ चन्द्ररूपायै नमः ।
ॐ इन्दिरायै नमः ।
ॐ इन्दुशीतलायै नमः ।

ॐ आह्लादजनन्यै नमः ।
ॐ पुष्टयै नमः ।
ॐ शिवायै नमः ।
ॐ शिवकर्यै नमः ।
ॐ सत्यै नमः ।
ॐ विमलायै नमः ।

ॐ विश्वजनन्यै नमः ।
ॐ तुष्ट्यै नमः ।
ॐ दारिद्र्यनाशिन्यै नमः ।

ॐ प्रीतिपुष्करिण्यै नमः ।
ॐ शान्तायै नमः ।
ॐ शुक्लमाल्यांबरायै नमः ।
ॐ श्रियै नमः ।
ॐ भास्कर्यै नमः ।
ॐ बिल्वनिलयायै नमः ।
ॐ वरारोहायै नमः ।
ॐ यशस्विन्यै नमः ।
ॐ वसुन्धरायै नमः ।

ॐ उदारांगायै नमः ।
ॐ हरिण्यै नमः ।
ॐ हेममालिन्यै नमः ।
ॐ धनधान्यकर्यै नमः ।
ॐ सिद्धये नमः ।
ॐ स्त्रैणसौम्यायै नमः ।
ॐ शुभप्रदाये नमः ।
ॐ नृपवेश्मगतानन्दायै नमः ।
ॐ वरलक्ष्म्यै नमः ।

ॐ वसुप्रदायै नमः ।
ॐ शुभायै नमः ।
ॐ हिरण्यप्राकारायै नमः ।
ॐ समुद्रतनयायै नमः ।
ॐ जयायै नमः ।
ॐ मंगळा देव्यै नमः ।
ॐ विष्णुवक्षस्थल स्थितायै नमः ।
ॐ विष्णुपत्न्यै नमः ।
ॐ प्रसन्नाक्ष्यै नमः ।

ॐ नारायणसमाश्रितायै नमः ।
ॐ दारिद्र्यध्वंसिन्यै नमः ।
ॐ देव्यै नमः ।
ॐ सर्वोपद्रव वारिण्यै नमः ।
ॐ नवदुर्गायै नमः ।
ॐ महाकाळ्यै नमः ।
ॐ ब्रह्माविष्णुशिवात्मिकायै नमः ।
ॐ त्रिकालज्ञानसंपन्नायै नमः ।
ॐ भुवनेश्वर्यै नमः ।

श्री धन धान्य महा लक्ष्म्यै नमः ।
अष्टोत्तर पूजां समर्पयामि ॥

---

४६ धूपं
ॐ धन धान्य महा लक्ष्म्यै नमः । धूपं आघ्रापयामि ॥

---

४७ दीपं
ॐ धन धान्य महा लक्ष्म्यै नमः । दीपं दर्शयामि ॥

---

४८ नैवेद्यं
( dip finger in water and write a square and 'shrii' mark inside the square. Place naivedya on 'shrii'. remove lid and sprinkle water around the vessel; place in each food item one washed leaf or flower or akshata )

ॐ महा लक्ष्म्यै च विद्महे ।
विष्णुपत्नी च धीमहि ।
तन्नो लक्ष्मी प्रचोदयात् ॥

ॐ धन धान्य महा लक्ष्म्यै नमः ॥

(Touch naivedya and chant 9 times) 'ॐ'
(sprinkle water around the naivedya)
(request Goddess to come for dinner)

ॐ धन धान्य महा लक्ष्म्यै नमः । अमृतोपस्तरणमसि स्वाहा ।
(drop water from sha.nkha)

ॐ धन धान्य महा लक्ष्म्यै नमः । नैवेद्यं निवेदयामि ॥

(cover face with cloth, and chant gaayatri ma.ntra five times or repeat 12 times OM mahalaxmyai namaH )
ॐ धन धान्य महा लक्ष्म्यै नमः । उत्तरापोषणं समर्पयामि ॥
(Let flow water from sha.nkha)

---

४९ पानीयं offer water for drinking
ॐ धन धान्य महा लक्ष्म्यै नमः । पानीयं समर्पयामि ॥

---

५० महा फलं chanting is optional
(put tulsi / axathaa on a big fruit)

इदं फलं मया देवी स्थापितं पुरतस्तव ।
तेन मे सफलावाप्तिर्भवेत् जन्मनि जन्मनि ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । महाफलं समर्पयामि ।

---

५१ फलाष्टक

(put tulsi/akshata on fruits)
ॐ धन धान्य महा लक्ष्म्यै नमः । फलाष्टकं समर्पयामि ॥

---

५२ करोद्वर्तन
ॐ धन धान्य महा लक्ष्म्यै नमः । करोद्वर्तनार्थे चंदनं समर्पयामि ॥

---

५३ तांबूलं
ॐ धन धान्य महा लक्ष्म्यै नमः । पूगिफलं ताम्बूलं समर्पयामि ॥

---

५४ दक्षिणा
ॐ धन धान्य महा लक्ष्म्यै नमः । सुवर्ण पुष्प दक्षिणां समर्पयामि ॥

---

५५ कर्पूर दीप optional
ॐ धन धान्य महा लक्ष्म्यै नमः । कर्पूर दीपं समर्पयामि ॥

---

५६ महा नीराजन aaratii - each one to do 5 to 10 seconds
(you can substitute aaratii songs as needed)
OM jaya jagadiisha hare, or jaya ambe gaurii or any Laxmi or devi bhajan

ॐ जय लक्ष्मी माता, मैया जय लक्ष्मी माता ।
तुम को निस दिन सेवत,
मैयाजी को निसदिन सेवत, हर विष्णु विधाता ।
ॐ जय लक्ष्मी माता ॥

उमा रमा ब्रह्माणी, तुम ही जग माता
ओ मैया तुम ही जग माता ।
सूर्य चन्द्र माँ ध्यावत, नारद ऋषि गाता
ॐ जय लक्ष्मी माता ॥

दुर्गा रूप निरन्जनि, सुख सम्पति दाता
ओ मैया सुख सम्पति दाता ।
जो कोई तुम को ध्यावत, ऋद्धि सिद्धि धन पाता
ॐ जय लक्ष्मी माता ॥

तुम पाताल निवासिनि, तुम ही शुभ दाता
ओ मैया तुम ही शुभ् दाता ।
कर्म प्रभाव प्रकाशिनि, भव निधि की दाता
ॐ जय लक्ष्मी माता ॥

जिस घर तुम रहती तहँ सब सद्गुण आता
ओ मैया सब सद्गुण आता ।
सब संभव हो जाता, मन नहीं घबराता
ॐ जय लक्ष्मी माता ॥

तुम बिन यज्ञ न होते, वस्त्र न कोई पाता
ओ मैया वस्त्र न कोई पाता ।
खान पान का वैभव, सब तुम से आता
ॐ जय लक्ष्मी माता ॥

शुभ गुण मंदिर सुंदर, क्षीरोदधि जाता
ओ मैया क्षीरोदधि जाता ।
रत्न चतुर्दश तुम बिन, कोई नहीं पाता
ॐ जय लक्ष्मी माता ॥

महा लक्ष्मीजी की आरती, जो कोई जन गाता
ओ मैया जो कोई जन गाता ।
उर आनंद समाता, पाप उतर जाता
ॐ जय लक्ष्मी माता ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । उत्तरनीराजनं समर्पयामि ।
ॐ धन धान्य महा लक्ष्म्यै नमः । महानीराजनं दीपं समर्पयामि ॥

---

५७ प्रदक्षिणा
circumambulate starting from right side
make everyone repeat
यानि कानि च पापानि जन्मांतर कृतानि च ।
तानि तानि विनश्यन्ति प्रदक्षिणे पदे पदे ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात् कारुण्य भावेन रक्ष रक्ष जनार्दनि ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । प्रदक्षिणान् समर्पयामि ॥

---

५८ नमस्कार
if time permits and volunteers are willing and able, offer 9 prostrations, each at the chant of one of her name

ॐ धन धान्य महा लक्ष्म्यै नमः । नमस्कारान् समर्पयामि ॥

---

५९ मंत्र पुष्प make everyone repeat

ॐ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः ॥

ॐ राजाधिराजाय प्रसह्य साहिने । नमो वयं वैश्रवणाय कूर्महे ।
स मे कामान् कामकामाय मह्यं । कामेश्वरो वैश्रवणो ददातु ।
कुबेराय वैश्रवणाय महाराजाय नमः ॥

ॐ स्वस्ति ! साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं
पारमेष्ठ्यं राज्यं महाराज्यं आधिपत्यमयं समन्तपर्यायि

स्यात्, सार्वभौमः सार्वायुशः आंतादापरार्धात्,
पृथिव्यै समुद्रपर्यन्ताय एकराळिति । तदप्येष
श्लोकोऽभिगीतो मरुतः परिवेष्टारो मरुत्तस्यावसन् गृहे ।
आविक्षितस्य कामप्रेर्विश्वेदेवाः सभासद इति ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । मंत्रपुष्पं समर्पयामि ॥

---

६० पुष्पांजलि
let everyone offer flowers coming near the altar

विद्या बुद्धि धनैश्वर्य पुत्र पौत्रादि संपदः ।
पुष्पांजलि प्रदानेन देहिमे ईप्सितं वरम् ॥

ॐ धन धान्य महा लक्ष्म्यै नमः । पुष्पांजलि समर्पयामि ॥

---

६१ राजोपचार make everyone repeat

ॐ धन धान्य महा लक्ष्म्यै नमः । छत्रं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । चामरं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । गीतं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । नृत्यं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । वाद्यं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । दर्पणं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । व्यञ्जनं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । आन्दोलणं समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । राजोपचारान् समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः । सर्वोपचारान् समर्पयामि ॥
ॐ धन धान्य महा लक्ष्म्यै नमः ।
समस्त राजोपचारार्थे अक्षतान् समर्पयामि ॥

---

६२ शङ्ख भ्रमण optional

(make three rounds of sha.nkha with water like aarati and pour down; chant OM 9 times and show mudras)

---

६३ तीर्थ प्राशन chanting optional

अकाल मृत्यु हरणं सर्व व्याधि निवारणं ।
सर्व पाप उपशमनं लक्ष्मी पादोदकं शुभम् ॥

---

६४ प्रसाद गृहणं

ॐ श्रीधनधान्यमहालक्ष्मी प्रसादं शिरसा गृह्णामि ॥

---

६५ optional
सुवासिनि पूजा

(make someone whom you are willing to consider as Dhana Mahalaxmii, sit; wash her feet, wipe, offer gandha kumkum flowers fruits and gifts and make obeisances)

॥ सुवासिन्ये वायन दानं ॥

इष्ट काम्यार्थ प्रयुक्त संयगाचरित श्रीधनधान्यमहालक्ष्मी
पूजां सम्पूर्ण फल वाप्यर्थं श्रीधनधान्यमहालक्ष्मी
स्वरूपाय सुवासिन्ये वायन दानं करिष्ये ॥

(offer coconuts and daxiNa to suvaasini )

ॐ धन धान्य महा लक्ष्म्यै नमः, वायनदानं प्रतिगृह्णातु
(प्रतिग्रह्णाम् - विलाति प्रतिवचनं)

---

६६ विसर्जन पूजा

आराधितानां देवतानां पुनः पूजां करिष्ये ॥

॥ पुनः पूजा ॥

ॐ धन धान्य महा लक्ष्म्यै नमः ।

ध्यायामि । ध्यानं समर्पयामि ।
पूजांते छत्रं समर्पयामि ।
चामरं समर्पयामि ।
नृत्यं समर्पयामि ।
गीतं समर्पयामि ।
वाद्यं समर्पयामि ।
आंदोलिकारोहणं समर्पयामि ।
अश्वारोहणं समर्पयामि ।
गजारोहणं समर्पयामि ।

ॐ धन धान्य महा लक्ष्म्यै नमः । समस्त राजोपचार देवोपचार
शक्त्युपचार भक्त्युपचार पूजां समर्पयामि ॥

---

६७ आत्म समर्पण make everyone repeat

यस्य स्मृत्या च नाम्नोक्त्या तपः पूजा क्रियादिशु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तं अच्युतम् ॥

मध्ये मन्त्र तन्त्र स्वर वर्ण न्यूनातिरिक्त लोप दोष
प्रायश्चित्तार्थं देवि नामत्रय महामन्त्र जपं करिष्ये ॥

ॐ धनलक्ष्म्यै नमः । धान्यलक्ष्म्यै नमः । महालक्ष्म्यै नमः । ।
ॐ धनलक्ष्म्यै नमः । धान्यलक्ष्म्यै नमः । महालक्ष्म्यै नमः । ।

ॐ धनलक्ष्म्यै नमः ।धान्यलक्ष्म्यै नमः ।महालक्ष्म्यै नमः ।।

मंत्रहीनं क्रियाहीनं भक्तिहीनं जनार्दन ।
यत्पूजितं मया देवि परिपूर्णं तथास्तु मे ॥

आवाहनं न जानामि, न जानामि विसर्जनम् ।
पूजाविधिं न जानामि क्षमस्व परमेश्वरि ॥

अनेन मया कृतेन श्री धन धान्य महा लक्ष्मी
सुप्रीतो सुप्रसन्नो वरदो भवतु ।

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः स्वभावात् ।
करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥

वर्तमाने व्यवहारिके बहुधान्य नाम संवत्सरे दक्षिणायणे,
शरद ऋतौ आश्वियुज मासे, कृष्ण पक्षे चतुर्दश्याम् तिथौ
हस्ता नक्षत्रे सोम वासरे श्री धनमहालक्ष्मी प्रीत्यर्थं
अनेन वयम् आचरित कल्पोक्त श्री धनमहालक्ष्मी पूजाराधनेन
भगवान श्री कृष्ण प्रीयतां ।प्रीतो भवतु ।
श्री कृष्णार्पणमस्तु ॥

---

६८ क्षमापनं

अपराध सहस्राणि क्रियन्ते अहर्निशं मया ।
तानि सर्वाणि मे देवि क्षमस्व परमेश्वरि ॥

यान्तु देव गण सर्वे पूजां आदाय पर्तिवीम् ।
इष्ट काम्यर्थ सिध्यर्थं पुनरागमनाय च ॥

(Shake the kalasha)

॥ श्री कृष्णार्पणमस्तु ॥

---

Puja Text by Sri S A Bhandarkar;
converted to suit ITRANS encoding.

Last updated on October 17, 1998;
Please send corrections to shree@usa.net